International Journal of Sanskrit Research 2020; 6(5): 24-29

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 24-29
© 2020 IJSR
www.anantaajournal.com
Received: 01-07-2020
Accepted: 14-08-2020

**Dr. Chandrakala R Kondi**
Assistant Professor, Central Sanskrit University, Rajiv Gandhi Campus, Sringeri, Chikkamagaluru, Karnataka, India

**Corresponding Author:**
**Dr. Chandrakala R Kondi**
Assistant Professor, Central Sanskrit University, Rajiv Gandhi Campus, Sringeri, Chikkamagaluru, Karnataka, India

# पण्डितराजजगन्नाथमते प्रतिभास्वरूपम्

**Dr. Chandrakala R Kondi**

## प्रस्तावना

इदं जगत् कार्यकारणभावबद्धमिति हेतोः न कुत्रचिदपि कार्योत्पत्तिः कारणं विना दृश्यते । यद्यपि काव्यरूपं कार्यम् 'अनन्यपरतन्त्रम्' इत्याह मम्मटाचार्यस्तथापि तत्रोपादानादिलौकिककारणाभाव एव विवक्षितस्तेन, न तु सर्वथा कारणाभावः । काव्यमपि कार्यकारणभावं नातिक्रामति । किं तर्हि तदिति जिज्ञासायां, कविगतप्रतिभायाः काव्यकारणत्वं सर्वेऽप्यङ्गीकुर्वन्ति, किन्तु भिन्नरीत्या । अर्थात् मम्मटादयः प्रतिभया सह व्युत्पत्त्यभ्यासावपि काव्यकारणान्तर्गतत्वेन परिगणयन्ति । '--त्रयः समुदिताः न तु व्यस्ताः--' [1] इतीदं वाक्यं तत्समर्थयति । तथापि व्युत्पत्त्यभ्यासाभ्यामपि प्रतिभाया आधिक्यं तेनापि प्रतिपादितम्-'शक्तिः कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत् प्रसृतं वोपहसनीयं स्यात्' [2] इति । आनन्दवर्धनाचार्येण, 'काव्ये दोषा यदि व्युत्पत्तिकृता अभ्यासकृता वा भवन्ति तर्हि ते दोषाः प्रतिभया संव्रियन्ते । किन्तु ते यदि प्रतिभान्यूनतया सम्भवन्ति तर्हि झटित्येव भासन्त' इति प्रतिभाया एव सर्वप्राधान्यं दत्तम् –

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
यस्त्वशक्तिकृतो दोषः झटित्येवावभासते ॥ [3]

इति । किन्तु पण्डितराजजगन्नाथस्य अभिप्रायोऽन्यदेव । सः प्रतिभामेकामेव काव्यकारणत्वेना-ङ्गीकरोति । कथमेतत्सङ्गच्छते ? जल-दोहदाभ्यां विना बीजस्याङ्कुरागमनस्याशक्यत्वमिव व्युतपत्त्यभ्यासाभ्यां विरहिता प्रतिभा कथं काव्यकारणं भवति ? इत्यादयः प्रश्नाः उद्भवन्ति । तत्परिहारार्थमत्र तेन प्रतिपादितरीत्या प्रतिभायाः स्वरूपम् किमिति समग्रतया निरूप्यते ।

## प्रतिभैव काव्यकारणम्

केवला कविगता प्रतिभैव काव्यकारणमित्यभिप्रैति जगन्नाथः । प्रतिभा कारयितृभावयितृभेदेन द्विविधाऽपि 'तस्य च कारणं कविगता केवला प्रतिभा' इत्युक्त्वा काव्यनिर्माणे कविगता अर्थात् 'कविनिष्ठा कारयित्री' प्रतिभा प्रधानेति संसूच्य,

प्रतिभाया एव शतांशेनापि काव्यकारणत्वं प्रतिपादयति । कविना भावितार्थ एव काव्य उल्लिख्यत इति कवेर्भावयित्री प्रतिभाप्यावश्यक्येव, तथापि कारयितृप्रतिभां विना काव्यरचनाया अप्रसरात् काव्यनिर्माणे चरमसामग्रीरूपेणोपयुज्यते कारयित्र्यैव प्रतिभा ।
सा च प्रतिभा 'काव्यघटनानुकूलशब्दार्थोपस्थितिः' इति तेन लक्षिता । अर्थात् काव्यं निर्मातुं ये शब्दा अर्थाश्चानुकूला उपयुक्ताश्च भवन्ति तेषां शब्दार्थानामुपस्थितिः काव्यनिर्माणकाले प्रतिभयैव भवति, नान्यथा । तेन काव्यनिर्माणौपयिकी शब्दार्थोपस्थितिरिति फलति । या प्रज्ञा प्रतिभेति मता सा नवनवोन्मेषशालिनीति, अपूर्ववस्तुनिर्माणक्षमेति प्रशंसिता । किन्तु तादृश्याः नवनवोन्मेषशालिन्याः, अपूर्ववस्तुनिर्माणक्षमाया वा प्रज्ञायाः शब्दार्थोपस्थापकत्व एव काव्यकारणत्वं, नान्यथेति प्रतिभाया मौलिकस्वरूपं स्पष्टीकृतं पण्डितराजेन प्रतिभालक्षणे 'शब्दार्थोपस्थिति'पदयोजनेन । काव्यघटनानुकूलपदेन ज्ञानगतं नवनवोन्मेषशालित्वम्, अपूर्ववस्तुनिर्माणक्षमत्वञ्च सङ्गृह्यते। उपस्थितिशब्दोऽत्र विलक्षणज्ञानबोधकः, न तु नव्यनैया- यिकमतानुसारं स्मरणार्थकः, स्मृतेषु पदार्थेषु नव्यताऽयोगात् इति रसगङ्गाधरग्रन्थस्य रसचन्द्रिकाव्याख्याकाराः पण्डिताः केदारनाथ झा महोदया अभिप्रयन्ति-
"एवञ्च नव्यनैयायिकानां सरणिमनुसृत्य स्मृतिमात्रे प्रसिद्धोऽ- प्ययमुपस्थितिशब्दो नात्र तथा, अपि तु ज्ञानमात्रे मानसप्रत्यक्षे वा । स्मृतानां नूतनत्वासम्भवात् । नूतनानामेव काव्यघटनाऽऽनुकूलत्वात् ।
एवं काव्यघटनानुकूलं शब्दार्थयोः विलक्षणं ज्ञानं प्रस्फुरणं वा प्रतिभेति पर्यवसितं प्रतिभालक्षणं, रुद्रटोक्तम्-

> मनसि सदा सुसमाधिनि विस्फुरणमनेकधाऽभिधेयस्य ।
> अक्लिष्टानि च पदानि विभान्ति यस्यामसौ शक्तिः ॥ [4]

इति लक्षणमनुकरोति ।
तस्यां प्रतिभायां वर्तमानो जातिविशेषः प्रतिभात्वम् । नैयायिकाः कारणे वर्तमानं धर्मं कारणतावच्छेदकमिति वदन्ति । तदनुसारं प्रतिभा काव्यकारणं चेत्तस्यां वर्तमानो धर्मः प्रतिभात्वं कारणतावच्छेदकं भवति ।
काव्यं शब्दरूपम् । नैयायिकमते शब्दो गुणरूपः । स च गुण- रूपः शब्दः आकाशरूपद्रव्याश्रितः । प्रतिभायास्तु ज्ञानविशेषत्वा- दात्माश्रिता सा । काव्यप्रतिभयोस्तदैव कार्यकारणभावो वक्तुं शक्यते यदा ते समानाधिकरणे स्तः । किन्त्वत्र काव्यस्याश्रय आकाशः तस्य (काव्यस्य) शब्दरूपत्वादाकाशस्य च शब्दगुणकत्वात्, प्रतिभायास्तु समवायसम्बन्धेन कवेरात्माश्रितत्वाद्भिन्नाधिकरणत्वं तयोः । अतस्तयोः कार्य-कारणभावसिद्ध्यर्थं कस्यापि सम्बन्धस्य कल्पनाऽऽवश्यकी । स च सम्बन्धः स्वानुकूलकृतिमत्त्वरूपः । स्वं काव्यम्-तदनुकूला कृतिः काव्यनिर्माणविषयकः प्रयत्नः- स च प्रयत्न आत्मनि (प्रयत्नवानात्मा) इति रीत्या प्रतिभा-काव्यनिर्माणकृत्योर्द्वयोरप्या- त्माश्रयत्वसिद्ध्या सामानाधिकरण्यं सिद्ध्यति । तेन तयोः कार्यकारणभावसिद्धिः।
चन्द्रालोककारोऽपि जगन्नाथ इव काव्यनिर्माणे व्युत्पत्त्यभ्यासौ प्रतिभायाः सहकारिणौ, न तु काव्यकारणभूतावित्येवाभिप्रैति-

> प्रतिभैव श्रुताभ्याससहिता कवितां प्रति ।
> हेतुर्मृदम्बुसम्बन्धबीजोत्पत्तिर्लतामिव ॥ [5]

इति । एवं मम्मटादिभिः यौ व्युत्पत्यभ्यासौ काव्यकारणांशत्वेन स्वीकृतौ, तौ जगन्नाथेन प्रतिभायाः कारणत्वेन स्वीकृतौ । तस्य कारणं त्वेवं वक्तुं शक्यते यत् व्युत्पत्त्यभ्यासयोः सत्वेऽपि यदि प्रतिभा नास्ति तर्हि काव्यनिर्माणमशक्यमेव । तयोरभावेऽपि प्रतिभायाः सत्त्वे काव्यनिर्माणं निश्चयेन भवति । अतः, प्रतिभासत्त्वे काव्यनिर्माणम्, प्रतिभाभावे काव्यनिर्माणाभाव इतिरीत्या अन्वयव्यतिरेकेण प्रतिभाया एव काव्यकारणत्वं सिद्ध्यति । यदि शापादिप्रतिबन्धकत्वं नास्ति तर्हि काव्यकारणं प्रतिभैव भवितुमर्हतीति तस्याभिप्रायः ।
अपि च जगन्नाथेनोक्तं प्रतिभालक्षणमपि तस्या एव काव्यकारणत्वं समर्थयति । मम्मटाचार्येण वामनाचार्येण च प्रतिभा संस्काररूपतया निरुक्ता । किन्तु संस्कारोऽपि ज्ञानद्वारैव काव्य- रचनानुकूलो भवति । भट्टतौतेनाभिनवगुप्तेन च नवनवोन्मेष- शालित्वेन, अपूर्ववस्तुनिर्माणक्षमत्वेन चोक्ता प्रतिभा चित्रादिनिर्माणे-ऽप्युपयुज्यत इति न तस्या विशिष्टता काव्यमात्रे । अत एव काव्यत्व- प्रयोजकप्रतिभालक्षणं जगन्नाथेन काव्यघटनानुकूलाशब्दार्थस्फूर्ति- रित्युक्तम् ।
यद्यपि काव्यप्रकाशकारेण शक्ति-व्युत्पत्त्यभ्यासानां समुच्चयस्य काव्यकारणत्वं प्रतिपादितम्, तथापि प्रतिभाऽपरपर्यायायाः शक्तेर्निर्वचनावसरे एवमुक्तम्-
"शक्तिः कवित्वबीजररूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत् प्रसृतं वोपहसनीयं स्यात्" इति । शक्त्यादित्रितयस्य कारणत्वेऽपि काव्यस्यानुपहसनीयतासम्पादिका प्रतिभैवेत्यनेन ज्ञायते। व्युत्पत्त्यभ्यासयोः कारणत्वस्वीकारमात्रेण काव्येऽनुपहसनीयत्वं न सम्पाद्यते । यतो हि व्युत्पत्त्यभ्यासयोः सत्त्वेऽपि प्रतिभाया अभावे

काव्यघटनानुकूलशब्दार्थोपस्थितिर्न भवतीति हेतोः तत्काव्यमुपहसनीयतामेव गच्छेदतः तयोः काव्यकारणत्वापेक्षया प्रतिभाकारणत्वमेवोचितम् । एवं व्युत्पत्त्यभ्यासयोरसत्त्वेऽपि केवलादृष्टजन्यप्रतिभया काव्यरचनाया सम्भवात्, तयोः सत्त्वेऽपि प्रतिभां विना काव्यरचनाया अशक्यत्वाच्च प्रतिभैव काव्यकारणमिति निश्चीयते ।

## प्रतिभात्वजातिसाधनम्

काव्यकारणरूपां प्रतिभां जातिविशेषत्वेन मन्यते जगन्नाथः । जातिस्तु प्रत्यक्षानुमानोपमानशब्दप्रमाणेष्वन्यतमेण साधनीया । तत्रापि पूर्वपूर्वस्यासिद्धावेव उत्तरोत्तरप्रमाणाश्रयणमतः प्रत्यक्ष- प्रमाणमेव प्रथमतयाऽनुसर्तव्यम् । तदाधारस्तु अनुगतप्रतीतिः । सर्वेषु घटेषु अनुगतैकाकारसत्त्वात् 'अयं घटः', 'अयं घट' इतिरीत्या प्रत्यक्षेणैव घटत्वजातिः सिद्ध्यति । किन्तु काव्यकारणभूतायाः प्रतिभाया अमूर्तत्वात् अनुगतैकाकाराभावान्नात्र प्रत्यक्षं प्रमाणमिति तदुत्तरमनुमानमाश्रीयते ।

काव्यकारणविषये प्रतिभा कारणम्, काव्यं च कार्यम् । तत्र शब्दार्थयुगलात्मकं काव्यं नात्मवृत्ति, शब्दस्यात्मवृत्तित्वाभावात्, किन्तु शब्दार्थमयकाव्यानुकूला कृतिरात्मनिष्ठा । स्वानुकूलकृतिमत्ता- सम्बन्धेन काव्यमपि आत्मनिष्ठमेव । तत्रात्मनि काव्यघटनानुकूलाया शब्दार्थोपस्थितिरूपाया प्रतिभाया समवायसम्बन्धेन सत्त्वात्, स्वानु-कूलकृतिमत्तासम्बन्धेन आत्मनि जायमानं काव्यं प्रति समवायेना-त्मनि वर्तमाना प्रतिभा कारणमिति कार्यकारणभावोऽङ्गीकरणीयः। तेन स्वविषयकज्ञानसमवायित्वसम्बन्धावच्छिन्न-कार्य(काव्य)त्वावच्छिन्नकार्यतानिरूपिताप्रतिभानिष्ठा कारणता सिद्ध्यति । ततश्च यत्र यत्र कारणतात्वं तत्र तत्र किञ्चिद्धर्मावच्छिन्नत्वमिति दण्डनिष्ठ-कारणतादौ सहचारदर्शनेन कारणतात्वं किञ्चिद्धर्मावच्छिन्नत्वव्याप्यमिति व्याप्तिज्ञानं लभ्यते । स च धर्मः प्रतिभात्वातिरिक्तं न भवितुमर्हति । ततः कारणतात्ववती एषा कारणता इति पक्षधर्मताज्ञानम् । ततो व्याप्तिस्मरणम् । ततः किञ्चिद्धर्मावच्छिन्नत्वव्याप्य-कारणतात्ववती एषा कारणतेति परामर्शज्ञानम् । ततः- 'स्वविषयकज्ञानसमवायित्वसम्बन्धावच्छिन्नकाव्यत्वावच्छिन्नकार्यता- निरूपिता समवायसम्बन्धावच्छिन्ना प्रतिभानिष्ठा कारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् घटनिष्ठकार्यतानिरूपितदण्डनिष्ठकारणतावत् ।' इत्यनुमानेन प्रतिभानिष्ठकारणतावच्छेदकतया कश्चिद्धर्मः सिद्ध्यति । 'सिद्ध्यतो धर्मस्य नित्यत्वे एकत्वे च लाघव'मिति लाघवज्ञानालम्बनेन नित्यतया एकतया च प्रतिभानिष्ठकारणतावच्छेदकतया प्रतिभात्वधर्म एव सिद्ध्यति, घटत्वादेः घटादिकारणतावच्छेदकत्वात् काव्यकारणतावच्छेदकत्वाभावात्, केवलादृष्टजन्यप्रतिभात्व-केवलव्युत्पत्त्यभ्यासजन्यप्रतिभात्वस्य च न्यूनवृत्तित्वात् । एवं प्रमाणितः जातिविशेषः प्रतिभात्वम् । नित्यत्वे सत्यनेकसमवेतत्वरूपसामान्य(जाति)लक्षणमपि तत्र समन्वेतीति जातित्वं तस्य सङ्गच्छते ।

एवं रीत्या, स्वानुकूलकृतिमत्त्वसम्बन्धेन काव्यत्वावच्छिन्ना या काव्यनिष्ठा कार्यता, तादृशकार्यतानिरूपिता या समवाय- सम्बन्धावच्छिन्ना प्रतिभानिष्ठा कारणता, सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, या या कारणता सा सा किञ्चिद्धर्मावच्छिन्ना, निरव- च्छिन्नायाः कारणताया अभावात्, यथा तन्तुवृत्तिकारणता तन्तुत्व- धर्मावच्छिन्ना, तथा प्रतिभावृत्तिकारणताऽपि प्रतिभात्वधर्मावच्छिन्ना इति काव्यकारणतया प्रतिभात्वजाति-सिद्धिर्भवति ।

तथापि उक्तानुमानेन यस्य प्रतिभात्वस्य सिद्धिर्भवति तत्तु जातिरूपमेव, न तु धर्ममात्रमित्यत्र किं प्रमाणम् इति सन्देह उदेति । तस्येदमुत्तरम्-प्रतिभात्वं धर्ममात्रमिति यदि वदेम तर्हि तस्यानन्त- ध्वंसस्य, अनन्तप्रागभावस्य, अनन्तसृष्टेश्च अङ्गीकरणीयताऽऽपतति, धर्मरूपस्य प्रतिभात्वस्यानित्यत्वात् । अनया गौरवभियैव प्रतिभात्वस्य जातिविशेषत्वाङ्गीकारद्वारा नित्यत्वाङ्गीकरणम् । तेन काऽपि क्षतिरपि नास्ति, लाघवमपि वर्तते ।

## प्रतिभात्वं सखण्डोपाधिः उताखण्डोपाधिः ?

काव्यघटनानुकूलशब्दार्थोपस्थितित्वरूपं प्रतिभास्वरूप-मुक्त्वा तद्गतश्च प्रतिभात्वं, काव्यकारणतावच्छेदकतया सिद्धो जातिविशेषः, उपाधिरूपं वा खण्डम् (वाऽखण्डम्) इत्युक्तवाञ्जगन्नाथः। अर्थात्तस्य मते प्रतिभात्वं जातिः अखण्डोपाधिः सखण्डोपाधिर्वेति द्विप्रकारेण वर्तते । तत्र नैयायिकमतानुसारं प्रतिभात्वस्य जातित्वं पूर्वं साधयित्वा, अनन्तरं तस्य जातित्वमसम्भाव्य सखण्डोपाधित्वेन सम्भावितवान् । तत्र कारणे विचारिते सति प्रतिभात्वस्य जातित्वायोग एव कारणमित्येव वक्तव्यम् । तस्य जातित्व-साधनावसरे काव्यं प्रति प्रतिभायाः समवायिकारणत्वं प्रतिपादितम् । किन्तु वस्तुतः काव्यवर्तिनोः शब्दार्थयोः काव्यं प्रति समवायि-कारणत्वमतः प्रतिभायास्तु असमवायिकारणत्वमेव वक्तुमुचितम् । परन्तु असमवायिकारणस्य

1. कार्येण सहैकस्मिन्नर्थे समवेतं सत् कारणम्

2. कारणेन सहैकस्मिन्नर्थे समवेतं सत् कारणम्

इति लक्षणद्वयेऽन्यतरमपि प्रतिभायां न समन्वेति । अर्थात् प्रतिभा काव्यं प्रति कार्यैकार्थप्रत्यासत्त्याऽपि असमवायिकारणं न भवति, कारणैकार्थप्रत्यासत्यापि न भवति । अतः यथा प्रतिभायाः काव्यकारणत्वं नैयायिकमतरीत्या प्रतिपादितं तथाऽसमवायिकारणत्वं प्रतिपादयितुं न शक्यम् । तेन नैयायिकमतानुसरणभिन्नतया एतच्छास्त्रानुरोधेन लक्षणान्तरं परिकल्प्य, प्रतिभाया काव्यासमवायि- कारणत्वं यथाकथञ्चित् साधयित्वा, तादृशकारणतावच्छेदकतया प्रतिभात्वजातिः साधयितव्या भवति । अत एव प्रतिभात्वस्य जातिविशेषत्वभिन्नतया तस्य उपाधित्वसाधने प्रवृत्तिर्जाता ।

वा खण्डमित्यनेन पण्डितराजेन प्रतिभात्वस्य सखण्डोपाधित्वमपेक्षितमुताखण्डोपाधित्वमिति विद्वत्सु चर्चा कृता वर्तते । यतः तस्य द्विधा विग्रहः कर्तुं शक्यते-

1. उपाधिरूपं वाऽखण्डम् (वा+अखण्डम्)
2. उपाधिरूपं वा खण्डम् चेति ।

रसगङ्गाधरस्य संस्कृतव्याख्याकारैः कैश्चित् प्रतिभात्वस्य सखण्डोपाधित्वपरतया कैश्चिच्च अखण्डोपधित्वपरतया व्याख्या कृता । नीलघटत्वादिवत् सखण्डोपाधिरेवेति वाऽर्थः । अखण्डमिति पाठस्तु चिन्त्य एव इत्युक्तं गुरुमर्मप्रकाशे । अत्र नागेश-भट्टः न केवलं प्रतिभात्वस्य सखण्डोपाधित्वमङ्गीकरोति, किन्तु तस्याखण्डोपाधित्वं दूषयत्यपि ।

नीलघटत्ववत् सखण्डोपाधिरूपं वा प्रतिभात्वम् इति चन्द्रिकाव्याख्याने ।

प्रतिभात्वमपि काव्यघटनानुकूलयोः शब्दार्थयोरुभयोरुपस्थितित्वेन रूपेण निर्वक्तुं शक्यत्वात् सखण्डोपाधिः इति मधुसूदन्याम् ।

हिन्दीव्याख्याकारेषु डा.प्रेमस्वरूपगुप्तमहाशयाः प्रमुखाः [6]। ते तु प्रतिभात्वस्याखण्डोपाधित्वमेवाङ्गीकुर्वन्ति । एतेषां मतानामालोचनेन प्रतिभात्वस्य सखण्डोपाधित्वमेव समर्थितं भवति । तेषामयमभिप्रायः-

पण्डितराजमतानुसारं प्रतिभात्वं यदि प्रतिभाया मूलरूपत्वेन स्वीक्रियते तदा तत्तु अखण्डोपाधिः, अदृष्टादिकारणसामग्र्या समुन्मीलिताया प्रतिभाया धर्मत्वेन स्वीकारे सखण्डोपाधिः । एवं प्रतिभात्वस्य पक्षद्वयम् ।

तत्र नैयायिकव्याख्यायाम् अदृष्टादिकारणसामग्रीसमुन्मीलितप्रतिभायामेव अधिकतया प्रकाशः प्रसारितः, न तु चेतनात्मकमूलरूपे । अत एतस्मिन् पक्षेऽपि प्रकाशसम्पातार्थं वेदान्तपदावली प्रयुक्ता तेन । यतो हि वेदान्तिमतानुसारं प्रतिभात्वमखण्डोपाधिर्भवति ।

तत्र प्रतिभाया अखण्डोपाधित्वस्वीकारे इदं कारणम्- निर्विकल्पकचेतना प्रतिभा । तदेव प्रतिभाया मूलरूपम् । प्रतिभाया इयं स्थितिः विकल्पदृष्ट्या, विलक्षणतादृष्ट्या वा अव्यक्तैव । मूलरूपेणानुन्मीलिता सा प्रतिभा विभिन्नरूपेणादृष्टेन व्युत्पत्त्यभ्या-साभ्यां वा समुन्मीलति । अतः प्रतिभात्वविशिष्टप्रतिभा उन्मीलिता-वस्थायां भवतीति तस्य सखण्डोपाधित्वं सङ्गच्छते । किन्तु चेतनात्मकमूलरूपत्वेन प्रतिभात्वस्याखण्डोपाधित्वमेव ।

मधुसूदनीव्याख्याने अखण्डत्व-सखण्डत्वरूपविभागयोः रहस्यमुक्तमस्ति । यः पदार्थो निर्वचनयोग्यो न, सोऽखण्दोपाधिः, यश्च निर्वचनयोग्यो भवति स सखण्डोपाधिरिति। अनुयोगितात्व-प्रतियोगितात्वादीनामखण्डोपाधित्वं तेषां निर्वचनानर्हत्वात्। किन्तु जातिभिन्नस्यापि प्रतिभात्वस्य व्युत्पत्त्यभ्यासजन्यप्रतिभावृत्तित्वेन भानात् तस्य निर्वचनयोग्यत्वमेव वर्तते। अत सखण्डोपाधित्वेन वक्तुमुचितम्।

पण्डितरजेनापि सखण्डोपाधित्वपक्ष एव समर्थितो वर्तत इति वक्तुं शक्यम् । यतः "प्रतिभात्वञ्च कवितायाः कारणतावच्छेदकं प्रतिभागतवैलक्षण्यमेव वा, विलक्षणकाव्यं प्रतीति नात्रापि सः" इति जातिभिन्नप्रतिभात्वस्य स्वरूपं प्रतिभागतवैलक्षण्यरूपेण निरुक्तं तेन ।

'सा च काव्यघटनानुकूलशब्दार्थोपस्थिति'रित्यत्र प्रतिभा उपस्थितिरूपा । तेन सा ज्ञानरूपा भवति । ज्ञानधर्मस्य चेतनारूपत्वे प्रमाणाभावात् प्रतिभागतधर्मस्य प्रतिभाया मूलरूपस्य वा प्रतिभात्वस्य चेतनारूपत्वमप्रमाणितम्। तस्य सखण्डोपाधित्वसमर्थनार्थं तु प्रमाणानि लभ्यन्त इति प्रतिभात्वस्याखण्डोपाधित्वमङ्गीकर्तुमनर्हम्।

**प्रतिभायाः कारणम्**

यदि काव्यस्य प्रतिभैव कारणं तर्हि प्रतिभायाः कारणं किं स्यात् ? काव्यकारणांशेनाङ्गीकृतयोः व्युत्पत्त्यभ्यासयोः किं स्थानम्? इति जिज्ञासायां जगन्नाथेनोक्तम्-"तस्याश्च हेतुः क्वचिद्देवतामहापुरुषप्रसादादिजन्यमदृष्टम्, क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकारणा- भ्यासौ इति । प्रतिभायाः हेतुद्वयम्-अदृष्टं व्युत्पत्त्यभ्यासौ चेति। अनेन अन्यालङ्कारिकैः काव्यकारणांशत्वेन स्वीकृतयोः व्युत्पत्त्यभ्यासयोः प्रतिभाकारणत्वेन स्थानमिति निर्णीतम् । देवतायाः महापुरुषप्रसादादिजन्यमदृष्टम्, क्वचिच्च विलक्षण-व्युत्पत्तिकाव्यकारणाभ्यासाविति तत्कारणत्वं जगन्नाथेन निरूपितम् । कस्या अपि देवताया विपुलतपोमाहात्म्यभाजां सिद्धपुरुषाणां वाऽनुग्रहेण समुत्पन्नभाग्यविशेषः प्रतिभायाः

क्वचित् कारणं भवति । विलक्षणाऽर्थात् काव्यज्ञशिक्षाप्रयोज्या नानाविधलोकवृत्त-शास्त्र-काव्येतिहासादीनां पर्यालोचनेन सञ्जाता व्युत्पत्तिः, (निपुणताविशिष्टं ज्ञानम्) पौनःपुन्येन काव्यरचनाभ्यासश्च मिलित्वा क्वचित् कारणं भवति। एवमुत्पन्नायाः प्रतिभायाः कार्यं भवति काव्यधाराप्रवाहः । तदा सः प्रतिभावान् काव्यनिर्माणे सफलो भवति । एवं कस्यचिद्देवता-प्रसादजन्यादृष्टेनैव, कस्यचित् पुनर्व्युत्पत्त्यभ्यासाभ्यामेवोत्पादिता प्रतिभा काव्यं जनयतीति सारम्। तत्र-

**अदृष्टम्**-अदृष्टं पुण्यविशेषः यद्देवता-महापुरुषादीना-मनुग्रहेण प्राप्यते। विद्वांसोऽपि वदन्ति-'मन्त्रानुष्ठाननिष्ठस्य नेदिष्ठा कविराजते'ति। मन्त्र-तन्त्र-यन्त्रानुष्ठानैरपि कवित्वं प्राप्यते। महाकविः श्रीहर्षः नैषधीयचरिते स्वयं लिखति यत्, तच्चिन्तामणिमन्त्रचिन्तनफले काव्ये महाचारुणि इति।

अर्थान्नैषधीयचरितमहाकाव्यं तस्य चिन्तामणिमन्त्रानुष्ठानस्यैव मधुरं फलम्।

**व्युत्पत्त्यभ्यासौ**-लोकवृत्त-शास्त्र-काव्यानामनुशीलनेनोत्पन्नं ज्ञानं व्युत्पत्तिः, निरन्तरकाव्यनिर्माणाभ्यासो व्युत्पत्तिः। अदृष्टव्युत्पत्त्यभ्यासा मिलित्वा प्रतिभां प्रति कारणानि न भवन्ति, किन्तु अदृष्टं व्युत्पत्त्यभ्यासयोरन्यतरस्यैव कारणत्वं सम्भवति। यतः व्युत्पत्त्यभ्यासौ विनाऽपि देवता-महापुरुषाद्यनु- ग्रहेणापि प्रतिभा जायत इति तादृशस्थले प्रतिभाया अदृष्टमेकमेव कारणं भवति न तु व्युत्पत्त्यभ्यासौ। तत्रैकः सन्दर्भः-पञ्चवर्षीयस्य कर्णपूरनामकस्य मूकबालकस्य मुखारविन्दे विलक्षणा काचित् कविताशक्तिः प्रादुरभूत् श्रीकृष्णस्यानुग्रहेण इति श्रूयते।

अदृष्टं व्युत्पत्तिरभ्यासश्च प्रतिभां प्रति स्वातन्त्र्येण कारणं भवन्ति, न मिलित्वैव । यतः व्युत्पत्तभ्यासौ विनापि केवलान्महा- पुरुषप्रसादादेव बालादेः प्रतिभोत्पत्तेः। तयोः जन्मान्तरीयत्व- कल्पनापि न युक्ता गौरवान्मानाभावाच्च। प्रतिभाया अदृष्टमात्रेणापि जन्यत्वसिद्धौ अदृष्टव्युत्पत्त्यभ्यासानां समुदितानां कारणता निरस्ता।

किन्तु केवलमदृष्टमेव कारणं प्रतिभाया इति न । व्युत्पत्त्यभ्यासावपि स्वतन्त्रतया कारणं भवतः । कश्चन विद्वान् किञ्चित्कालपर्यन्तं काव्यरचनायामसमर्थः सन्, निरन्तराभ्यासबलेन व्युत्पन्नो भूत्वा काव्यरचनायां सामर्थ्यं प्राप्नोति । तदा अदृष्टं विना व्युत्पत्त्य- भ्यासाभ्यामेव जातायाः प्रतिभायाः कारणादेव काव्यरचना क्रियत इति व्युत्पत्त्यभ्यासयोः स्वतन्त्रतया प्रतिभां प्रति कारणत्वम्। किञ्चित्कालपर्यन्तं प्रतिभाभाववतोऽनन्तरं प्रतिभा जायते तदपि अदृष्टमेव, न तत्र व्युत्पत्त्यभ्यासयोः कारणत्वमिति यद्युच्यते, तर्हि तस्यादृष्टस्य प्रतिबन्धकत्वादि कल्पनीयं भवति। तेन तावत्पर्यन्तमदृष्टस्य प्रतिबन्धकत्वम्, अनन्तरं तस्य निवारणमित्या- द्यङ्गीकरणीयत्वाद्गौरवम् । यतोऽसङ्ख्येषु प्रतिबन्धकेषु निश्चित- रूपेणायमेव प्रतिभायाः प्रतिबन्धक इति वक्तुमशक्यत्वात्ता-दृशानिश्चितप्रतिबन्धककल्पनापेक्षया निश्चितयोः व्युत्पत्त्यभ्यासयोः कारणत्वाङ्गीकार एव लाघवम्।

अदृष्टजन्यप्रतिभा काञ्चिद्विलक्षणतां भजते, या व्युत्पत्त्य-भ्यासाभ्यां जातायां न भवति । प्रतिभागतवैलक्षण्यमेव तत्तत्कारण- निरूपितकार्यतायाः परिचायकं भवति । अर्थात्, अदृष्टनिष्ठकारणता निरूपितप्रतिभारूपकार्यता अन्या, व्युत्पत्त्यभ्यासनिष्ठकारणता-निरूपितप्रतिभारूपकार्यता अन्यैव । प्रतिभागतकार्यताया विलक्षणतैव तत्तत्कारणवैलक्षण्यस्य ज्ञापिका भवति।

तर्हि, यत्र व्युत्पत्त्यभ्यासयोः सत्त्वेऽपि प्रतिभा नोत्पद्यते तत्र कारणसत्त्वेऽपि कार्याभावरूपान्वयव्यभिचारः खलु ? इति यद्युच्यते तर्हि तस्य परिहारः द्विधा वक्तुं शक्यम् -

1. विलक्षणप्रतिभां प्रति विलक्षणयोरेव व्युत्पत्त्यभ्यासयोः कारणत्वमङ्गीक्रियते। यदि तत्र वैलक्षण्यं नास्ति तर्हि तयोः कारणतावच्छेदकत्वमेव न सङ्गच्छते । वैलक्षण्यसत्त्वे तु व्युत्पत्त्य- भ्यासाभ्यां प्रतिभाऽवश्यं जायत एवेति नान्वयव्यभिचारः।
2. पापविशेषरूपप्रतिबन्धककल्पनयाऽपि स दोषो निवार्यते । पापविशेषः प्रतिबन्धकः । प्रतिबन्धकाभावस्य कारणत्वं सर्वेऽपि, अर्थात् समुदितकारणतावादिनः शक्तिमात्रकारणतावादिनश्चाङ्गी- कुर्वन्ति । तेन प्रतिबन्धकसत्त्वे कार्याभावः सिद्ध एव। लोकेऽपि काव्य-प्रबन्धनिर्मातॄणां मन्त्र-तन्त्रादिना वाक्स्तम्भनद्वारा काव्यनिर्माणेऽ- समर्थता दृश्यते । तादृशकारणेनापि व्युत्पत्त्यभ्यासयोः सत्त्वेऽपि प्रतिभा न जायते।

एवं काव्यस्य कारणं प्रतिभामात्रम्, प्रतिभायास्तु कदाचिददृष्टं कदाचिच्च विलक्षणव्युत्पत्त्यभ्यासाविति निर्णीयते । कस्यचिद्देवतादिप्रसादजन्यादृष्टेनैव, कस्यचित् पुनर्व्युत्पत्त्यभ्यासाभ्यामेवोत्पादिता प्रतिभा काव्यं जनयति।

## संधर्व सूची


1. काव्यप्रकाशः-प्रथमोल्लासः-कारिका-२ वृत्तिभागः
2. तत्रैव
3. ध्वन्यालोक-उद्योत-३, परिकरश्लोकः
4. काव्यालङ्कारः
5. चन्द्रालोक-प्रथममयूखः

6. पण्डितराज के अनुसार प्रतिभा का मूलरूप अर्थात् प्रतिभात्व तो अखण्ड उपाधि है, अदृष्टादिकारणसामग्री से उन्मीलितप्रतिभा सखण्ड उपाधि ।
---नैयायिकव्याख्या में -- चेतनात्मकमूलरूप पर अधिकप्रकाश नहीं पढसका है । प्रतिभा के इस पक्ष को भी प्रकाश में लाने के लिए वेदान्ती पदावली का प्रयोग किया है । उस के अनुसार प्रतिभात्व को अखण्डोपाधि कहा गया है ।
तो प्रतिभात्व को अखण्ड उपाधि कहने का तात्पर्य यह हुआ कि प्रतिभा का मूलरूप निर्विकल्पकचेतना है । यह स्थिति विकल्प या विलक्षणताओं की दृष्टि से अव्यक्त अथवा अनुन्मीलित है । विभिन्नरूप अदृष्टों से अथवा व्युत्पोअत्ति अभ्यास से इस का उन्मीलन होता है । फलतः प्रतिभात्व्चविशिष्टप्रतिभा उन्मीलित अवस्था में आती है । 'रसगङ्गाधर का शास्त्रीय अध्ययन' इत्यस्मिन् ग्रन्थे)